International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 56-57
© 2026 IJMH
www.themultijournal.com
Received: 28-02-2026
Accepted: 13-03-2026
Publish : 14-03-2026

**दुर्गाशङ्करपण्डा**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**दुर्गाशङ्करपण्डा**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# समुद्रशतकदिशा समुद्रस्य पौराणिकं महत्वम्

**दुर्गाशङ्करपण्डा**

## 1. प्रस्तावना-

आधुनिकसंस्कृतसाहित्ये शतककाव्यपरम्परा अद्यापि सजीवत्वेन वर्तते। तस्यां परम्परायां डॉकृष्णकेशवषडङ्गिमहोदयस्य समुद्रशतकम् इति काव्यं विशिष्टं स्थानम् आवहति। २०२०तमे वर्षे प्रकाशिते ग्रन्थेऽस्मिन् एकाधिकैकशतं श्लोकाः(१०१) सन्ति। काव्यमेतत् समुद्रस्य पौराणिक-प्राकृतिक-दार्शनिक-सामाजिक-नैतिकस्वरूपाणि समन्वयेन प्रकाशयति। अत्र समुद्रस्य मानवीयजीवनस्य, समाजस्य, वैभवस्य, गर्वस्य, दानशीलतायाः, उपेक्षायाः, दुःखस्य च विषये वर्णितमस्ति। सुललित-छन्दसा रचितं शतकमिदं पठकानां मनः सम्मोहयति । अन्योक्ति-अर्थान्तरन्यासालङ्कारयोः प्रयोगः अत्र काव्यस्य शोभां वर्धयति । पुनश्च उपजाति-वसन्ततिलक-वंशस्थ-शिखरिणी-मालिनी-स्रग्धरा-पृथ्वी-शार्दुलविक्रिडितमित्यादीनां छन्दसां विन्यासः द्रष्टुं शक्यते ।

## 2. समुद्रशब्दस्यार्थः-

समुद्रो नाम जलसमूहस्थानम्। अस्य व्युत्पत्तिर्भवति यथा- चन्द्रोदयात् आपः सम्यगुन्दन्ति क्लिद्यन्ति अस्मिन्निति। अर्थात् चन्द्रोदयेन जलसमूहो यस्मात् क्लिन्नो भवति स समुद्रः। चन्द्रोदयात् समुन्दयन्ति वा समुद्रः। वायुपुराणानुसारम् अपां चैव समुन्नेन स समुद्र इति स्मृतः । मत्स्यपुराणानुसारम् अपां चैव समुद्रेकात् समुद्र इति संज्ञितः । समुद्रशब्दस्य बहवः पर्यायवाचकशब्दाः परिदृश्यन्ते । प्रथमतः जलस्य पर्यायवाचकान् शब्दानधिकृत्य शब्दाः यथा- अब्धिः, अम्बुधिः, अम्भोधिः, उदन्वान्, उदधिः, जलधिः, नीरधिः, पयोधिः, तोयधिः, वनधिः, पाथोधिः, कीलालधिः, वारिधिः, वार्धिः, सलिलधिः, भुवनधिः, जीवनधिः, कन्धिः, अम्बुनिधिः, अम्भोनिधिः, जलनिधिः, वारिनिधिः, वारांनिधिः, नीरनिधिः, पयोनिधिः, पाथोनिधिः, सलिलनिधिः, तोयनिधिः, अपां निधिः, वननिधिः, जीवननिधिः, कीलालनिधिः, कंनिधिः, अम्बुराशिः, अम्भोराशिः, जलराशिः, जलपतिः, अप्पतिः, अपां पतिः, अपां नाथः, वारीशः, कम्पतिः इत्यादयः । द्वितीयतः नद्याः पर्यायवाचकशब्दानधिकृत्य शब्दाः यथा- नदीपतिः, नदीनः, नदीश्वरः, सरित्पतिः, सरितां पतिः, वाहिनीपतिः, धुनीपतिः, तटिनीशः प्रभृतयः । तृतीयतः अन्ये विशिष्टशब्दाः यथा-अर्णवः, सागरः, समुद्रः, रत्नाकरः, मकरालयः, यादपतिः इत्यादयः । एतेषु शतकेऽस्मिन् केचन शब्दाः विशेषतया प्रयुक्ताः । अपि च अम्बुनाथः, उदनाथः, सरित्पतिः, अप्पतिः, सलिलधिः इत्यादीनां नुतनशब्दानामपि प्रयोगः अत्र दरीदृश्यते।

## 3. समुद्रस्य पौराणिकमहत्वम् –

भारतीयपौराणिकपरम्परायां समुद्रस्य विशिष्टं महत्त्वं वर्तते। श्रीमद्भागवतपुराणे समुद्रः ब्रह्मणः मेढ्रात् उत्पन्नः इति वर्णितः। ब्रह्मवैवर्तपुराणे सप्तसमुद्राणां नामानि निर्दिष्टानि। श्रीकृष्णस्य विरजायाः जाताः सप्त पुत्राः तस्याः अभिशापेन सप्त समुद्ररूपेण परिणताः इति। तद्यथा -

**लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।**
**एतेषां च जलं पृथ्व्याः शस्यार्थं च भविष्यति ।**
**व्याप्ताः समुद्राः सप्तैव सप्तद्वीपां वसुन्धराम्**[1] ॥

क्षीरसागरस्य मन्थनवृत्तान्तो श्रीमद्भागवते सविस्तरं वर्णितोऽस्ति । यथा-

**कृतस्थानविभागास्ते एवं कश्यपनन्दनाः ।**
**ममन्थुः परमं यत्ता अमृतार्थं पयोनिधिम्[2] ।।**

समुद्रसम्बद्धेषु आख्यानेषु समुद्रमन्थनम् अतीव प्रसिद्धम्। देवासुरैः अमृतप्राप्त्यर्थं क्षीरसागरस्य मन्थनं कृतं, तस्मात् चतुर्दशरत्नानि प्रादुर्भूतानि आसन् । वाल्मीकिरामायणे श्रीरामेण समुद्रे सेतुबन्धः कृतः। श्रीमद्भागवते समुद्रः अवधूतस्य गुरुरूपेण धैर्य, गाम्भीर्य, समत्वस्य प्रतीकरूपेण वर्णितः। भगवद्गीतायां समुद्रः स्थितप्रज्ञः इति कथितः।

विष्णोः क्षीरसागरशयनं, मीनावतारेण वेदसमुद्धरणं, श्रीकृष्णेन द्वारकास्थापनं, तथा स्कन्दपुराणे जगन्नाथदारुविग्रहस्य समुद्रोत्पत्तिः इत्यादयः सर्वे समुद्रस्य महत्त्वं प्रकाशयन्ति। समुद्रः तीर्थराजरूपेण अपि पूज्यते सागरतीरे स्नानं, दानं, पितृतर्पणं च महापुण्यकरमिति मन्यते। समुद्रः भारतीयपरम्परायां सृष्टेः, अवतारलीलानां, तीर्थमहिम्नः, धर्मस्य, आध्यात्मिकतायाश्च महत्त्वपूर्णः प्रतीकः रूपेण प्रतिपादितः। एतत् सुन्दरभावेन कविना वर्णितम् । तथोक्तम् -

**दैतेयामरकर्षणैर्विमथितः पाथोनिधे निर्दयं**
**गण्डूषोदरकन्दरे विलुठितः पीतः पुरा हेलया ।**
**निर्दोषोऽपि निबन्धितश्च नितरामुल्लङ्घितः खातवद्**
**दग्धस्त्वं वडवानलेन महतां कष्टं भृशं सर्वथा[3] ॥**

अनेन समुद्रस्य मानवीयगुणानां प्रकाशः भवति । समुद्रशतके कविः विष्णोः क्षीरसागरे शयनविषये लिखति । लक्ष्मीः तत्र सेवां करोति, तथा समुद्रः स्वयं परमदिव्यधामरूपेण विराजते। समुद्रः बाह्यतः गर्जमानः, उच्छलतरङ्गयुक्तः, किन्तु अन्तः परमेश्वरस्य विश्रान्ति-स्थानम् । तदर्थं समुद्रः मनुष्यहृदयस्य अपि प्रतीकत्वेन ग्राह्यः। पुनश्च समुद्रमन्थनात् अमृतेन सह हलाहलविषमपि प्रादुरभवत्। समुद्रशतके कविः एतत् तथ्यं सूक्ष्मतया दर्शितवान्। एतेन समुद्रः सुखदुःखयोः, विषामृतयोः, क्लेशोपकारयोः, शापवरयोः च संयुक्तः इति प्रति-पाद्यते। एतत् सर्वं मानवजीवनेन सह सम्बन्धितम्। यथा मन्थनं विना अमृतं न लभ्यते, तथा दुःखं विना परमानन्दो न प्राप्यते। कविः पौराणिकवर्णनेन जीवनदर्शनं प्रस्तौति।

समुद्रः यद्यपि लक्ष्म्याः पिता, विष्णोः शयनस्थानं, रत्नाकरः, अमृतनिधिः इत्यादिभिः युक्तः, तथापि अगस्त्येन पीतः। अतः तस्य गौरवः नष्टः अभवत्। अत्र **"निर्लज्ज सरित्पते"** इति समुद्रं सम्बोध्य एनं विषयम् उपस्थापितम्। यथा -

**लक्ष्म्यास्तातपदाद्धरेगृहपदादस्तास्पदत्वाद्रवेः**
**रत्नाशेषसुधापयोनिधिपदात् प्राज्याशयाच्चाथ वा ।**
**रे निर्लज्ज सरित्पते पदमदाद् गर्जस्यहो किं मुधा**
**पीतस्त्वं मुनिना यदा चुलुकवत्क्वासीत्पदं ते वद[4] ॥**

लवण-इक्षु-सुरा-सर्पि-दधि-दुग्धजलादिनां पुराणवर्णितसप्तसागरा-णां विषये अत्रापि उल्लेखः द्रष्टुं शक्यते। श्लोकेऽस्मिन् यथा -

**क्वचिद्धिमशिलाभृतः क्वचन भानुतप्तोदकः**
**प्रशान्तहृदयः क्वचित् क्वचन तुङ्गभङ्गाकुलः ।**
**पुराणकथनात्पयोलवणकादिभेदान्वितो**
**न केन भुवनत्रये त्वमवधार्यसेऽप्यम्बुधे[5] ॥**

केवलमत्र समुद्रस्य पौराणिकमहत्वं न प्रतिपादितम्, अपि तु आधुनिकदृष्ट्या समुद्रस्य अवस्था वर्णिता।

पुनश्च समुद्रः समेषां तीर्थक्षेत्राणां राजा इति कथ्यते । विशेषतः उत्कलप्रदेशे महोदधिः नाम्ना प्रसिद्धः, तथा निलाद्रीनाथस्य सन्निधौ स्थितः सन् मोक्ष्यमार्गस्य पावनस्नानस्य धार्मिक विस्वासस्य च केन्द्रमिति भक्तैः पूज्यते। एतत् सर्वं समुद्रशतके कविः उल्लिखति यत् –

**श्रीक्षेत्रे स्वयमत्र राजति जगन्नाथः सभद्राग्रज-**
**स्तीर्थाणि प्रथितानि सन्ति तदपि प्रायेण तेष्वर्णव ।**
**श्रीशानुग्रहतो महोदधिपदं सत्तीर्थराजाभिधां**
**संप्राप्तोऽसि च देवमृग्यसुकृतं तुभ्यं च तस्मै नमः[6] ॥**

महोदधिनिकटे श्रीजगन्नाथपुर्यां श्रीक्षेत्रे सुभद्रया बलभद्रेण च सह स्वयं श्रीजगन्नाथः विराजते। महोदधिदर्शनपूर्वकं स्वर्गद्वारेण गमना-गमनं पुण्यप्रदम् इति पुराणेषु वर्णितम्।

## 4. उपसंहारः-

डॉकृष्णकेशवषडङ्गिमहोदयस्य समुद्रशतके समुद्रस्य पौराणिक-विषयवर्णनं समृद्धं शास्त्रसम्मतं च दृश्यते। कविः समुद्रं केवलं रत्नाकर, अमृतनिधि, लक्ष्म्याः पिता, विष्णोः शयनभूमिः, वाडवाग्निधारकः, सप्तसागररूपः, तीर्थराजः इत्यादिषु रूपेषु न चित्रयति, अपि तु तेषां माध्यमेन मानवजीवनस्य यथार्थस्वरूपं दर्शयति। एतस्मात् समुद्रशतकं पौराणिकानां नीतिदर्शनसांस्कृतिक-चेतनानां समन्वयेन आधुनिकसंस्कृतसाहित्यरत्नम् इति निर्विवादं वक्तुं शक्यते।


**संदर्भग्रन्थसूची -**

१- समुद्रशतकम् - डॉकृष्णकेशवषडङ्गिः


**सङ्केताक्षरसूची-**

१- श्री.भा - श्रीमद्भागवत
२- ब्र.वै.पु - ब्रह्मवैवर्तपुराणम्
३- स.श. – समुद्रशतकम्

**पादटिप्पन्यः-**

1. ब्र.वै.पु - श्रीकृष्णजन्मखण्डः-३
2. श्री.भा - श्रीमद्भागवते -८.७
3. स.श -६
4. स.श. -११
5. स.श -५३
6. स. श -१०१